दिनाङ्क :-06.01.2025

प्रात: - 06:55

**अथ वार्ताः**

**पीएम रेलवे परियोजना :**

प्रधानमन्त्री नरेन्द्रमोदी अद्य आभासीयमाध्यमेन विभिन्नानां रेलवे-परियोजनानां उद्घाटनम् आधारशिलास्थापनं च विधास्यती। क्षेत्रे संपर्कं इतोपि संवर्धयितुं प्रमुखस्य पदक्षेपस्य अन्तर्गतं प्रधानमन्त्री नूतनस्य जम्मूरेलविभागस्य उद्घाटनं करिष्यति। सः तेलङ्गानाराज्ये चरलापल्ली- न्यूटर्मिनल् इति स्थात्रस्यापि उद्घाटनं करिष्यति तथा च ईस्ट-कोस्ट इति पूर्वतटरेलवे- इत्यस्य रायगड़ रेलवे-विभागभवनस्य आधारशिलाम् अपि स्थापयिष्यति।

**प्रधानमंत्री- आयुर्वेदशोधसंस्थानः**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः नवदिल्ल्याः रोहिणीक्षेत्रे केन्द्रीयायुर्वेदशोधसंस्थायाः नूतनभवनस्य शिलान्यासः आभासीय-माध्यमेन कृत: । नूतनं अत्याधुनिकं भवनं प्रायः पञ्चाशीत्यधिकैकशत कोटिरूप्यकाणां व्ययेन निर्मितं भविष्यति । द्वि दशमलव द्विनवतिः एकड़परिमिते क्षेत्रे परम्परां नवीनतां च संयोजयिष्यति, समग्रचिकित्सायाः, विशेषचिकित्सालयानां, कौशलविकासाय च नूतनावकाशान् प्रदास्यति। श्रीमोदी स्वसम्बोधने निर्धनानाम् अत्यन्तं निर्धनानाम् च कृते स्वास्थ्यसेवा: सुलभं कर्तुं प्रशासनस्य प्रतिबद्धतां बोधितवान्।

**भारतामेरिका - सुरक्षापरामर्शदौ**

राष्ट्रियसुरक्षापरामर्शदः अजीतडोवालः अद्य नवदिल्ल्यां स्वीयेन अमेरिकादेशीयेन समकक्षेण जेक-सुलिवन् इत्यनेन सह मेलनं करिष्यति। राष्ट्रियसुरक्षापरामर्शदौ उपवेशनस्य समये गभीर-उदीयमान-प्रौद्योगिकी (iCET) इत्यादिभिः द्विपक्षीयविषयैः सह सम्बद्धाः विषयाः च विस्तृतरूपेण चर्चिता: भविष्यन्ति। गतसप्ताहे विदेशमन्त्रालयस्य प्रवक्ता रणधीरजायवालः वार्ताहरान् अवदत् यत् भारतस्य अमेरिकादेशस्य च सम्बन्धः विस्तृतः अस्ति, यत्र उभयोः पक्षयोः मध्ये निरन्तरं विस्तृतं च चर्चा भवति।

**वायुगुणवत्ताप्रबन्धनायोगः**

वायुगुणवत्ताप्रबन्धनायोगस्य ग्रेडेडप्रतिक्रियाकार्ययोजना उपसमित्या, तत्कालप्रभावेण सम्पूर्णे राष्ट्रीयराजधानीक्षेत्रे संशोधितस्य ग्रैप- इत्यस्य तृतीयचरणं निरस्ती कृतम् अस्ति। परंच द्वितीयचरणस्य प्रथमचरणस्य च अन्तर्गतं सर्वाणि कार्याणि यथावदेव प्रचलन्ति।

**दत्ताश-नियमा:**

प्रशासनम् अवोचत् यत् अङ्कीय-वैयक्तिक-दत्तांश-संरक्षण-नियमानां प्रारूपस्य उद्देश्यं नागरिकाणां वैयक्तिक-दत्तांशस्य संरक्षणार्थम् अधिकाराणां रक्षणम् अस्ति। एते नियमा: त्रयोविंशत्यधिक-द्विसहस्र-

तमवर्षस्य दत्तांश-संरक्षण-अधिनियमस्य कार्यान्वयनं कर्तुं प्रयतन्ते, यत् 'अङ्कीय-वैयक्तिक-दत्तांशस्य संरक्षणार्थ दृढसंरचनां निर्मातुं भारतस्य प्रतिबद्धतायाः अनुरुपमस्ति ।

**स्क्वैश**

स्क्वैश-क्रीडायां भारतस्य अनाहतसिंहः इङ्ग्लैण्ड्-देशस्य बर्मिन्घम्-नगरे ब्रिटिश-जूनियर-ओपन इत्येतस्याः स्पर्धायाः निर्णायक-चक्रे प्रविष्टवती।

**फुटबॉल - भारतीयसुपरलीगः-**

भारतीयसुपरलीगफुटबॉलक्रीडायां केरलब्लास्टर्स्-क्लब इत्यनेन दलेन गतरात्रौ नवदिल्ल्याः जवाहरलालनेहरू-क्रीडाङ्गणे पञ्जाब-एफसी-क्लब इत्येतं दलं एकम् शून्यम् इत्यङ्कांतरालेन पराजितम्।